डॉ० उपेन्द्र झा
एसो० प्रो०
एस० एस० डीमकसि
कुशेश्वरस्थान

शास्त्री तृतीय खण्डस्य कृते (साहित्य)

अविमृष्टविधेयांशः वाक्यदोषत्वं प्रतिपादनम् ।

अविमृष्टः = प्राधान्येनानिर्दिष्टः, विधेयांशो यत्र सः, अविमृष्टविधेयांशः । अस्यैव विधेयाविमर्श इति नामान्तरम् । अर्थात् विधेयस्य प्राधान्येनानिर्दिष्टतया गुणीभूतत्वम् अविमृष्टविधेयांशत्वम् । अतो वाक्ये तस्य प्राधान्येन निर्देशः समुचितः । प्राधान्यं च पदार्थान्तरे विधेयांशस्योपादेयत्वेन ज्ञातव्यम् । विधेयांशप्राधान्यस्य विपर्ययः (गुणीभूतत्वम्) च क्वचित् समासेन प्राधान्यविपर्ययस्तु पददोषः । यत्र चोद्देश्यविधेययोः पौर्वापर्यविपर्ययः तत्र वाक्यदोषः । उक्तं च —

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित् प्रतितिष्ठति ॥

अनुवाद्यम् = उद्देश्यम् । तत्र पददोषो यथा —
'स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः ।'

अत्र वृथात्वं विधेयम् । तच्च समासे गुणीभावादनुवाद्यत्वेन प्रतीतिकृत् । अर्थात् अत्र उच्छूनत्वमुद्दिश्य वृथात्वस्य विधेयता उचिता । किन्तु तत्पुरुषसमासे वृथात्वम् उच्छूनत्वे विशेषणीभूतमिति गुणीभूतं सत् विधेयतया न प्रतीयते इति दोष एव । यथा वा - रक्षांसि पुरः स्थातुमलं रामानुजस्य मे । अत्र रामस्य इति वाच्यम् । यथा वा आसमुद्रक्षितीशानाम् अत्र आसमुद्रम् इति वाच्यम् । यथा वा यत्र ते पतति सुभ्रु ! कटाक्षः षष्ठबाण इव पञ्चशरस्य । अत्र षष्ठ इवेत्युत्प्रेक्ष्यम् । यथा वा 'अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा' । अत्र अमुक्ता इत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवोचितम् । अत्र सर्वत्र उदाहरणेषु विधेयस्य समासे गुणीभावात् विधेयत्वेनाऽप्रतीतिरेव दोषः ।

वाक्यगतो यथा - 'न्यक्कारो ह्ययमेव मे यदरयः' । इत्यादिः अत्र अयमेव न्यक्कारः इति न्यक्कारस्य विधेयत्वं विवक्षितम् । तच्च एवं रचना वैपरीत्येन गुणीभूतम् रचना च पदक्रमस्य विपरीतेति वाक्यदोषः ।

इति

शास्त्री द्वितीय खण्डस्य कृते (साहित्यम्

डॉ० उपेन्द्र झा
साहित्य विभाग
रा० कु० सं० महाविद्यालय
कुरुक्षेत्र, हरियाणा

## ध्वनि-गुणीभूतव्यङ्ग्ययोर्भेदम्

ध्वनेः लक्षणं प्रतिपाद्य ग्रन्थकारेण ध्वनिगुणीभूतव्यङ्ग्ययोर्भेदम् प्रतिपादयति यत - यत्र तु व्यङ्ग्यार्थो वाच्यार्थापेक्षया नाधिक-चमत्कारी किन्तु तुल्यचमत्कारी न्यूनचमत्कारी वा तत्र तु गुणीभूतव्यङ्ग्यम्। यथा—

'ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥'

'अत्र वञ्जुललतागृहे दत्तसङ्केता नागता' इत्यपेक्षया वाच्यार्थस्यैवाधिकचमत्कारित्वमिति गुणीभूतव्यङ्ग्यमिदम्। एवं तुल्यचमत्कारित्वेऽपि बोध्यम्।

तत्र ध्वनिः द्विविधः —
एकः लक्षणामूलः,
अपरः अभिधामूलः।

तत्र लक्षणामूलध्वनेः, अविवक्षितम् = अनुपयुक्तम्, अन्वयायोग्यं वा वाच्यं वाच्यार्थो यत्र स अविवक्षितवाच्य इति नामान्तरम् ज्ञेयम्। विवक्षितम् - अन्वययोग्यम्, अन्यपरं = व्यङ्ग्य उपसर्जनीभूतं, वाच्यं - वाच्यार्थो यत्र स विवक्षितान्यपरवाच्य इति अभिधामूलध्वनेः नामान्तरम्।

इत्यत्र लक्षणामूलध्वनेः अभिधामूलध्वनेर्मध्ये अति सूक्ष्ममन्तरम्। सूक्ष्मप्रज्ञावद्भिः विचारयन्तु सुधीवराः।

इति

Jun 3, 2021

शास्त्री प्रथम खण्ड वृत्ते (साहित्य)

डॉ० उपेन्द्र झा
साहित्य विभाग
[illegible]

## काव्यस्य प्रयोजन प्रतिपादनम् ।

काव्यस्य मुख्यं प्रयोजनं चतुर्वर्ग फलप्राप्तिरेव यथा चोक्तम् —

चतुर्वर्गफलप्राप्तिः ............... ।
........ तत्स्वरूपं निरूप्यते ॥

चतुर्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत्प्रवर्तितव्यम् न रावणादिवत् । इत्यादि कृत्याकृत्य प्रवृत्ति निवृत्त्युपदेश द्वारेण सुप्रतीतैव । अतएव काव्यस्योपादेयतां लक्षीकृत्य भामहेनोक्तम् —

धर्मार्थ काम मोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिंच साधुकाव्य निषेवणम् ॥

धर्मप्राप्तिः — काव्यतो धर्मप्राप्तिर्हि भगवन्नारायणचरणारविन्दस्तवादिना । एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग्भवति इत्यादि वेद वाक्येभ्यश्च सुप्रसिद्धैव । यथाऽऽदित्य प्रसादतो मयूरो नाम कविः पापाद्विनिर्मुक्तोऽभूत् ।

अर्थप्राप्तिः — अर्थप्राप्तिश्च श्री हर्षादिभ्यो धावकादीनां कवीनां प्रसिद्धैवास्ति ।

कामप्राप्तिः — कामप्राप्तिस्तु अर्थद्वारैवेति विदितमेवास्ति ।

मोक्षप्राप्तिः — मोक्षप्राप्तिश्च काव्यजन्य धर्म फलानुसन्धानात् । उक्तं च भगवता श्रीकृष्णेन — 'युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीमिति' अपि च 'तरति शोकमात्मवित्' इत्यादि ब्रह्मज्ञान-प्रतिपादके - मोक्षोपयोगि वाक्ये व्युत्पत्त्याधायकत्वाच्च । काव्योपादेयत्वं अग्निपुराणेऽपि उक्तम् — नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥ इति
त्रिवर्ग साधनं नाट्यम् इति च ।
विष्णु पुराणेऽपि —

'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः' ॥ इति

एवं काव्योपादेयतायामेतानि वचनानि प्रमाणानि, इति